निर्घण्टः ॥ (हरीतकीशब्दे विवरणविशेषोऽस्याः ज्ञातव्यः ॥)

जीवनी, स्त्री, (जीवत्यनेनेति । जीव + करणे ल्युट् ङीप् च ।) जीवन्ती । (पर्य्याया यथा,—
"जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा ।
मङ्गल्यनामधेया च शाकश्रेष्ठा पयस्विनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) काकोली । डोड़ी । मेदा । महामेदा । इति राजनिर्घण्टः ॥ यूथी । इति शब्दचन्द्रिका ॥

जीवनीयं, क्ली, (जीव्यतेऽनेन अस्माद्वा । जीव + करणे अपादाने वा अनीयर् ।) जलम् । इति हेमचन्द्रः ॥ (जीवनप्रदे, त्रि । यथा, सुश्रुते । १ । ४५ ।
"गोक्षीरमनभिष्यन्दि स्निग्धं गुरु रसायनम् ।
जीवनीयं यथा वातपित्तघ्नं परमं स्मृतम् ॥")

जीवनीयगणः, पुं, (जीवनीयानामोषधीनां गणः ।) औषधविशेषः । यथा, वैद्यकपरिभाषायाम् ।
"अष्टवर्गश्च पर्णिन्यौ जीवन्ती मधुकन्तथा ।
जीवनीयगणः प्रोक्तो जीवनस्तु पुनस्तथा ॥"
("जीवन्ती काकोल्यौ मेदे द्वे मुद्गमाषपर्ण्यौ च ।
ऋषभकजीवकमधुकं चेति गणो जीवनीयाख्यः॥"
इति च वाभटे सूत्रस्थाने पञ्चदशेऽध्याये ॥)

जीवनीया, स्त्री, (जीवनीय + टाप् ।) जीवन्ती । इत्यमरः । २ । ४ । १४२ ॥

जीवनेत्री, स्त्री, (जीवं नयतीति । जीव + नी + तृच् + ङीप् च ।) सैंहली । इति राजनिर्घण्टः ॥

जीवनौषधं, क्ली, (जीवनस्य औषधं उपायविशेषः ।) येन म्रियमाणो जीवति तदौषधम् । जीवरक्षाकारि । जीवनोपायः । तत्पर्य्यायः । जीवातुः २ । इत्यमरः । २ । ६ । १२० ॥

जीवन्तः, पुं, (जीवयति जीव्यतेऽनेन वा । जीव + "रुहिनन्दिजीविप्राणिभ्यः षिदाशिषि ।" उणां । ३ । १२७ । इति झच् ।) औषधम् । प्राणः । आयुर्व्विशिष्टे, त्रि । इत्युणादिकोषः ॥ जीवशाकः । इति राजनिर्घण्टः ॥

जीवन्तिकः, पुं, (जीवान्तकः । पृषोदरात् साधुः ।) जीवान्तकः । इत्यमरटीकासारसुन्दरी ॥

जीवन्तिका, स्त्री, (जीवयतीति । जीव + झच् + कन् टाप् च । कापि अत इत्वम् ।) वन्दा । वृक्षोपरिजातवृक्षः । गुड़ूची । जीवाख्यशाकः । इति मेदिनी । के, १६० ॥ जीवन्ती हरीतकी । इति राजनिर्घण्टः ॥

जीवन्ती, स्त्री, (जीवन्त + ङीष् ।) लताविशेषः । जीवइ इति जीयाती इति च भाषा । तत्पर्य्यायः । जीवनी २ जीवनीया ३ जीवा ४ मधुः ५ । इत्यमरः । २ । ४ । १४२ ॥ जीवना ६ मधुस्रवा ७ स्रवा ८ । इति तट्टीका ॥ पयस्विनी ९ जीवा १० जीवदा ११ जीवदात्री १२ शाकश्रेष्ठा १३ जीवभद्रा १४ भद्रा १५ मङ्गल्या १६ क्षुद्रजीवा १७ यशस्या १८ शृङ्गाटी १९ जीवदृष्टा २० काञ्जिका २१ शशशिम्बिका २२ सुपिङ्गला २३ । इति राजनिर्घण्टः ॥ मधुश्वासा २४ जीववृषा २५ सुखङ्करी २६ भृगराटिका २७ जीवपत्री २८ जीवपुष्पा २९ । इति केचित् ॥ (यथा,—
"वरा शाकेषु जीवन्ती सर्षपाख्यवराः परम् ॥"
इति वाभटे सूत्रस्थाने षष्ठेऽध्याये ॥)
अस्या गुणाः । मधुरत्वम् । शीतत्वम् । रक्तपित्तवायुक्षयदाहज्वरनाशित्वम् । कफवीर्य्यविवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥ स्वादुत्वम् । स्निग्धत्वम् । त्रिदोषनाशित्वम् । रसायनत्वम् । वलकारित्वम् । चक्षुर्हितत्वम् । ग्राहित्वम् । लघुत्वञ्च । इति भावप्रकाशः ॥ श्वासकासधातुक्षयनाशित्वम् । स्वरकारित्वञ्च । सुराष्ट्रदेशजस्वर्णवर्णहरीतकी । सा स्नेहपाके प्रशस्ता जीर्णरोगनाशिनी । इति राजवल्लभः ॥ (अस्याः लक्षणं यवह ञ्च यथा,—
"जीव ा स्वर्णवर्णिनी ॥"
"जीवन्ती सर्व्वरोगहृत् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
शमी । गुड़ूची । (पर्य्याया यथा,—
"गुड़ूची मधुपर्णी स्यादमृतामृतवल्लरी ।
छिन्ना छिन्नरुहा छिन्नोद्भवा वत्सादनीति च ॥
जीवन्ती तन्त्रिका सोमा सोमवल्ली च कुण्डली ।
चक्रलक्षणिका धीरा विशल्या च रसायनी ॥
चन्द्रहासी वयस्था च मण्डली देवनिर्म्मिता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
वन्दा । इति मेदिनी । ते, ११२ ॥ डोड़ी । इति राजनिर्घण्टः ॥ (जीव इति शाकविशेषः । शर्करावन्मधुरपुष्पा व्रततिः । अस्याः पर्य्याया यथा,—
"जीवन्ती जीवनी जीवा जीवनीया मधुस्रवा ।
मङ्गल्यनामधेया च शाकश्रेष्ठा पयस्विनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

जीवन्मुक्तः, त्रि, (जीवन्नेव मुक्तः आत्मज्ञानेन मायाबन्धरहितः ।) जीवद्दशायां मायाबन्धरहितः । (यथा, देवीभागवते । १ । १९ । ४८ ।
"जीवन्मुक्तः स राजर्षिर्ब्रह्मज्ञानमतिः शुचिः ।
तथ्यवक्तातिशान्तश्च योगी योगप्रियः सदा ॥")
तल्लक्षणं यथा । "स्वस्वरूपाखण्डशुद्धब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वस्वरूपाखण्डे ब्रह्मणि साक्षात्कृते सति अज्ञानतत्कार्य्यसञ्चितकर्म्मसंशयविपर्य्ययादीनामपि बाधितत्वादखिलबन्धरहितो ब्रह्मनिष्ठः ।
'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व्वसंशयाः ।
क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे॥'
इत्यादिश्रुतेः ।
अयन्तु व्युत्थानसमये मांसशोणितमूत्रपुरीषादिभाजनेन शरीरेण आन्ध्यमान्द्यापटुत्वादिभाजनेनेन्द्रियग्रामेण अशनायापिपासाशोकमोहादिभाजनेनान्तःकरणेन च तत्तत्पूर्व्वपूर्व्ववासनया क्रियमाणानि कर्म्माणि भुज्यमानानि ज्ञानाविरुद्धान्यारब्धफलानि च पश्यन्नपि बाधितत्वात् परमार्थतो न पश्यति । यथा इदमिन्द्रजालमिति ज्ञानवान् तदिन्द्रजालं पश्यन्नपि परमार्थमिदमिति न पश्यति । सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव समना अमना इव सप्राणोऽप्राण इव इत्यादिश्रुतेः । उक्तञ्च ।
'सुषुप्तवज्जाग्रति यो न पश्यति
द्वयञ्च पश्यन्नपि चाद्वयत्वतः ।
तथापि कुर्व्वन्नपि निष्क्रियश्च यः
स आत्मविन्नान्य इतीह निश्चयः ॥' इति ।
अस्य ज्ञानात् पूर्व्वं विद्यमानानामेवाहारविहारादीनां अनुवृत्तिवच्छुभवासनानामेवानुवृत्तिर्भवति । शुभाशुभयोरौदासीन्यं वा । तदुक्तम् ।
'बुद्धाद्वैतसतत्त्वस्य यथेष्टाचरणं यदि ।
शुनां तत्त्वदृशाञ्चैव को भेदोऽशुचिभक्षणे ॥
ब्रह्मवित्त्वं तथा मुक्त्वा स आत्मज्ञो न चेतरः' इति ।
तदानीममानित्वादीनि ज्ञानसाधनान्यद्वेष्टृत्वादयः सद्गुणाश्चालङ्कारवदनुवर्त्तन्ते । तदुक्तम् ।
'उत्पन्नात्मावबोधस्य ह्यद्वेष्टृत्वादयो गुणाः ।
अयत्नतो भवन्त्यस्य न तु साधनरूपिणः ॥' इति ।
किं बहुना अयं देहयात्रामात्रार्थमिच्छानिच्छापरेच्छाप्रापितानि सुखदुःखलक्षणान्यारब्धफलान्यनुभवन्नन्तःकरणाभासादीनामवभासकः सन् तदवसाने प्रत्यगानन्दपरब्रह्मणि प्राणे लीने सति अज्ञानतत्कार्य्यसंस्काराणामपि विनाशात् परमकैवल्यमानन्दैकरसमखिलभेदप्रतिभासरहितमखण्डं ब्रह्मावतिष्ठते । न तस्य प्राणा उत्क्रामन्त्यत्रैव समवलीयन्ते विमुक्तश्च विमुच्यते । इत्येवमादिश्रुतेः ।" इति वेदान्तसारः ॥

जीवपुत्त्रकः, पुं, (जीवः प्राणन् पुत्त्र इव । पुत्त्रवर्द्धनकत्वात् तथात्वम् । इवार्थे कन् ।) इङ्गुदीवृक्षः । इति शब्दरत्नावली ॥ वृक्षविशेषः । इत्यमरटीकायां रमानाथः ॥ जीयापुता इति भाषा ॥

जीवपुष्पा, स्त्री, (जीवयतीति । जीव + णिच् + अच् । जीवं प्राणदं पुष्पमस्याः ।) बृहज्जीवन्ती । इति राजनिर्घण्टः ॥

जीवप्रिया, स्त्री, (जीवानां प्राणिनां प्रिया हितकारित्वात् ।) हरीतकी । इति राजनिर्घण्टः ॥

जीवभद्रा, स्त्री, (जीवानां प्राणिनां भद्रं मङ्गलं यस्याः ।) जीवन्तीलता । वृद्धिनामौषधम् । इति राजनिर्घण्टः ॥

जीवमन्दिरं, क्ली, (जीवस्य आत्मनो मन्दिरं गृहमिव ।) शरीरम् । इति शब्दचन्द्रिका ॥

जीवला, स्त्री, (जीवं उदरस्थकृमिं लाति गृह्णाति नाशयतीति । ला + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) सैंहली । इति राजनिर्घण्टः ॥

जीववल्ली, स्त्री, (जीवयतीति जीवा प्राणदात्री । सा चासौ वल्ली चेति ।) क्षीरकाकोली । इति राजनिर्घण्टः ॥